संसारः, [1]परिसर्या, [2]सस्रिः; [3]सारथिः, [4]सृकः, [5]सरण्डः, [6]सृणीकः, [7]सृमाकुः, [8]सरीमा, [9]अप्सरसः, [10]सरित्, [11]सरणिः, [12]सरट्, सरटः, [13]सरयुः-सरयूः, इत्यादिकानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम्।

(1914) "सृ गतौ" (III-जुहोत्यादिः-1434. सक. अनि. पर.)

सर्वाण्यपि रूपाणि पिपर्तिवत् (1044) ऊह्यानि।

(1915) "सृज विसर्गे" (IV-दिवादिः-1178. सक. अनि. आत्म.)

'—सर्गे सृज्यते सृजतीति च।' (श्लो. 62) इति देवः।

सर्वाण्यपि रूपाणि भौवादिकमृजूधातुवत् (1302) ज्ञेयानि। [14]स्रष्टा,

---

1. परितः सरणं **परिसर्या**। 'इच्छा' (3-3-101) इत्यत्र 'परिचर्यापरिसर्या—' (वा. 3-3-101) इति स्त्रियां भावे शे यकि टापि च रूपमेवम्। गुणोऽपि निपात्यते।
2. 'भाषायां धाञ्कृसृ—' (वा. 3-2-171) इति तच्छीलादिषु कर्तृषु किकिनौ, लिड्वद्भावात् द्विर्वचनं च।
3. औणादिके [द. उ. 1-43) णथिन्प्रत्यये रूपमेवम्। णित्वात् उपधावृद्धिः।
4. 'सृवृ—' [द. उ. 3-19] इति कप्रत्ययः। किच्च भवति। **सृकः**=वायुः।
5. औणादिके (द. उ. 5-9) अण्डन्प्रत्यये रूपमेवम्। **सरण्डः**=वायुः, भूतसंघातश्च।
6. औणादिके (द. उ. 3-42) ईकन्प्रत्यये नुगागमे च रूपमेवम्। किच्च भवति। **सृणीकः**=वायुः।
7. औणादिके (द. उ. 1-151) काकुप्रत्यये मुगागमे च रूपम्। **सृमाकुः**=मृगजातिः।
8. 'हृभृधृसृ—' (द. उ. 6-76) इति ईमनिन्प्रत्ययः च्छन्दसि विषये। **सरीमा**=कालः।
9. अप्छब्द उपपदे धातोः असुन्प्रत्यये (द. उ. 9-101) रूपमेवम्। अद्भ्यः सृता इत्यप्**सरसः**=देवयोषितः।
10. 'हृसृ—' (द. उ. 6-3) इति इतिप्रत्यये रूपम्।
11. 'अर्त्तिसृ—' (द. उ.1-2) इत्यनिप्रत्यये णत्वे च रूपमेवम्। **सरणिः**=ईषद्गतिः पन्थाः।
12. औणादिके (द. उ. 5-10) अडिप्रत्यये रूपम्।
13. औणादिके (द. उ. 1-136) अयुप्रत्यये रूपम्, सरति सिसर्ति वा **सरयुः**=नदी वायुर्वा। **सरयूः**=इति दीर्घान्तोऽपि।
14. '**सृजि**दृशोः—' (6-1-58) इति अमागमो भवति। लघूपधगुणापवादोऽयमागमः। 'व्रश्चभ्रस्जसृज—' (8-2-36) इत्यादिना जकारस्य षकारः; तृचस्तकारस्य ष्टुत्वेन टकारः।